
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

पारवल अंक	शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
M-2571	कर्मदीतसूत्र अध्याय ५	–	दर्शन	पूर्ण	–	3/4	34	संस्कृत	कागद	10	43		

कर्कश्रौतसूत्रभाष्ये चतुर्थाध्यायारंभः ॥ ४ ॥

॥ श्रीगणेशाय नमः ॥ ॥ अपराह्णे पिंडपितृयज्ञश्चंद्रादर्शनेमावास्यायां ॥ अस्यार्थमनुविधित्सुनाचार्येण पौर्णमा
समनुविहितां इदानीमवसरप्राप्तं दर्शस्यानुविधानं कर्त्तव्यं तत्तत्र प्राक्कालीनः पिंडपितृयज्ञः सोनुविधेयइत्य
त आह। अपराह्णे पिंडपितृयज्ञ इति। आह्नोऽपरोभागः अपराह्णः तृतीयोभाग इत्यपरे। पिंवोकाशेषात्। पूर्वा
ह्णे वै देवानामित्युपक्रम्य अपराह्णः पितृणां पिंडपितृयज्ञ इति पिंडदानकर्मनामार्थानुगमात्संज्ञेयं योगिकी। पि
डैः पितृयज्ञः पिंडपितृयज्ञ इति। होमस्य चतादर्थ्याद्दर्शनात्। स देवैः प्रसूतोथैतस्पितृभ्यो ददातीति। मासिमासि
वोऽशनमिति च प्रत्तस्य देवैः षन पुरस्तात्पश्चाद्द्ध्रे येभ्यो ददातीत्याह। पिंडदानमेवाभिधीयते। न जपहोमा
दिप्रयोजनं। तदकरणेप्याहुतिः। चंद्रादर्शनमप्यादिनापि भवति तन्माभूदित्यमावास्ययाविशेष्यते। तदेवेच्यता
मितिचेत्। नामावास्याशब्दस्य कर्मविषयतापि दृश्यते। चतुर्होत्रा पौर्णमासीमभिमृशेत्संच होत्रामावास्यामिति। त
त्रैकोदोषः। चतुर्दश्यामुपवासप्रसंगेपि प्राप्नोति। अस्तु तथेतिचेत्। न। श्रुतिविरोधात्। यद्देवैषन पुरस्तात्पश्चाद्दद्ध्राइ हेरंब
ति। अनेन च दर्सपोलक्ष्यते। तस्मिन्क्षीणेददातीति हि श्रूयते। स च परमः क्षपः। इतरस्त्वप्रसह्यमेवम भवति। एवं च सतिपरमक्ष २॥

यद्विक्षिष्ट एव काले पिंडपितृयज्ञो नान्यथेति। यथा राजसूये पशुमध्ये आमावास्येदाक्षायणे चाग्रवर्विकामावास्यायां दृ
ष्टेपि चंद्रमस्यपराह्णे परमक्षयइति क्रियत एव काले पिंडपितृयज्ञः। यद्वैवैषन पुरस्तान्न पश्चाद्ददृशइति सपि
पत्नसपणार्थत्वात्। तस्मिन्नक्षीणे दहातीसयथदक्षीणेदघासमदृष्टे हृत्कुर्याद्देवेभ्यश्च पितृभ्यश्चेति। ।दक्षिणाग्नौ
श्रपणं होमश्च गार्हपत्ये आहवनीयापवादो यं वचनात्। परिस्तीर्यते पूर्ववत् साद्यासादनमेकस्मात्। तमिसवाभ्य
मानेन त्रापतेकस्य परिस्तरणमिति तन्निर्देशः। पूर्ववदिति श्रपणस्य पश्चादुत्तरत आर्थत्वेति। हृद्दतामाभू
देकस्मादिति। । अपरेण गार्हपत्यं चरुमपूर्णेऽस्रुक्चं वा तूष्णीं गृहीत्वोत्तरेण दक्षिणाग्निमुद्वहतीति यतः सज
ध्येनेन गार्हपत्यमिति वचनात्। अपूर्णता चरोः स्रुचश्च। अपूर्णोपि तत्पणामिति। तूष्णीमिति वचनेनौकिकवाणुच्चारण
प्रतिषेधः। न ह्यत्र मंत्रप्राप्तिरस्य पूर्ववत्त्वात्। उत्तरेणाचाहार्यपचनं दक्षिणाग्निं पुरस्तान्नवहतीति वचनात्। ।सकृत्फ
लीकरोति। फलीकरणं पुनः पुनर्लोके प्राप्तं अतः सकृदुच्यते। । सकृत्तंडुलमपूर्णेऽश्रपयित्वाभिघार्योद्वास्य मे
क्षणेन जुहोत्यग्नयइति सोमायेति च। सकृच्छब्दः सकलतंडुलवाची प्रसिद्धः। इष्टश्चिन तावा वाक्यशेषात् सूताम्

पा० क० तं पित्रूणामिति ॥ प्रसिद्धिरन्नैकांतिकी । शुंरुण्यपिसारकर्मप्रयोगात् । पूर्णे वैदेवानामर्द्धपूर्णे मनुष्याणामुपये
२ द्धं पितॄणामित्यस्य पूर्णग्रहणं । अपधित्वाभिधारयत्याज्येनात कुतोऽन्यत्रापि दर्शनात् । आज्येनाभिधार्येति । तत्रय
थाकथंचिदभिधारणमात्रं । नियमाभावात् । उद्धासनं दक्षिणतः । पित्र्यत्वात् । पूर्वेणाग्नीं यमे क्षणेन जुहोति अग्नय
इति सोमायेति नमस्त्रुवैकं कतमयं । आहुतिसंबंधात् । होमश्चायज्ञोपवीतिनाप्राङ्मुखेनैवा दैवत्वात् । सद्द्यस्यांते
द्वे आहुती जुहोति देवेभ्य इति । न च पित्र्यकर्मांगत्वात् । प्रधानोपचारन्यायाद्वांगा नाम्नापि च यज्ञे च दैवाज्यप्र
हणेयज्ञोपवीतिविधानात् । स यज्ञोपवीती भूत्वाज्यानिगृह्णातीति प्रासानुवाद इति चेत् । नान्यपरत्वाद्वाक्यस्यामंत्रति
गाच्च । कव्यवाहनायपितृमत इति कव्यवाहनः पितॄणामिति । पितृसंबंधात् । तस्माद्भिन्नवदेवहोमः ॥ ११ ॥ प्रास्यत
दक्षिणेनोल्मुखमुपहताइत्यपरेणा ॥ अग्नौमेक्षणमभ्यादधातीति । दक्षिणेनापरेणवाग्नेरेवास्थिरनुतिशाखा
तेरात् ॥ ११ ॥ उल्मुकं परस्तात्करोतीति ये रूपाणीति । छेखोयाः ॥ ११ ॥ उदपात्रेणावनेजयत्यपसव्यं ठः सव्येन वा द्धरणासाम हेरंब
र्थ्यात् । अत्राभिनयेन श्रुतिकदघादिता । उद्धरणसामर्थ्यादितिा । इतीव वैदेवेभ्यो गुहुद्धरंति मनुष्येभ्यो ये वं पित्र २

णमिति। पाणौ हितीर्थं चतुष्टयं। अग्रे देवतीर्थं। मूले मनुष्याणामिति। अग्रेर्वमिस्यं गुष्ठमूले वा कनिष्ठिकायदेशे
वा। तत्रांगुष्ठमूले पितृतीर्थं स्मर्यते तेन तु स पसव्यमिति। कनिष्ठिकोदेशो हि सव्यतामति। सा च पिच्ये तु चितेति॥ ॥असा
ववनेनि द्वितीययजमानस्य पितृप्रभृतित्रीन्। असाविति नामादेशः पूर्वकं यजमानस्य पितृप्रभृतित्रीनवनेजयति॥ ॥
उपमूलं सकृदाच्छिन्नानि लेखायां तत्राय यथावनिक्तं पिंडान् ददात्यसावेतत्त इति॥ अन्नमिति वा धाहारः उपमू
लमिति अस्वप दविग्रहोतित्य समासः मूलसमीपे यानि सकृदाच्छिन्नानि तृणानि तान्युपमूलं दिनानि बर्हिस्तृणानि।
अन्यत्रापि तृणार्थे दृष्टमुक्त वाता लेखायां तत्रा यथावनिक्तं यत्र यत्रावनेजनं कृतं तत्र तत्रापि पिंडान् ददात्यसावेतत्त इ
ति पितृप्रभृति। ये च त्वामन्विति पिके मंत्रशेषं कुर्वंति॥ अत्र पितर इत्युक्त्वोदङ्ङास्त आतमनात॥ ॥ पिंडानामभिमुखो
नोच्छ्वासः प्रदक्षिणं गत्वोदङ्मुखस्तिष्ठन् मना दूर्वा कु॥ ॥ आहृत्यामीमदंतेति जपति॥ आवर्तमंते मैव मार्गेण। अथो पप स्थ्य य
जपतीसुपदेशात्॥ ॥ अवनेज्य पूर्ववन्नीविं विस्रस्य नमो व इत्यंजलिं करोतीति विस्रंसनोपदेशात् पूर्ववेमेव नीविमस
रिधानं प्रतिनमस्कारं चांजलिकरणं षड्भिर्नमस्करोतीति वचनात्। सूत्रकारानुपदेशान्नेति चेत् महापित्र्यज्ञे उक्त

पि॰ पू॰ त्वात्। षड्ढा नमस्करोतीति श्रुतेस्तत्स्यत्वात्॥ ॥ एतद्वः इत्युपास्यतीत्यत्र त्रीणिप्रतिपिंडं बहुवचनोपदेशात् त्रीणि त्रीणि
॥ ॥ऊर्णा दशा वा वितिवृद्धिकल्पः॥ ॥ वय स्युत्तरे यजमानस्तो मानि वा। उत्तरग्रहणादेवयसी अभिप्रेते। ततश्चोर्ध्व
२ पंचाशतः॥ ॥ऊर्जं मित्य पानिषिंचति॥ पिंडमूलेषु ततश्चनाध्वर्युरवजिघ्रति। अथावजिघ्रति प्रस्रवधायपिंडानि
ति। प्रतिप्रयोगसामर्थ्याद ध्वर्युरेव प्रस्रवधानो स्य प्रयोगं नेति चेत्तास्यात् कालार्थत्वात्। निरुप्याज्यं प्रातर्दोहं न
मितियथा॥ ॥उल्मुकं सत्तदा किनान्यगतो आदधातीति वा व्यत्रोषः। तत्र पूर्वेसत्तदाछिन्नानि कृत्वा ततउल्मुकं स
त्तदाछिन्नान्यग्नावभ्यादधाति पुनरुल्मुकमपि सृजतीति वचनात्। अत्रादिवादस्त्वाग्न्यरत्वा पूर्वनियातः॥ ॥ आ
धत्तेति मध्यमपिंडं पत्नी प्राश्नाति पुत्रकामा। प्रसवसमर्थेति का व्यक्षेषः। पिंडपितृयज्ञस्याधिकारनिरूपणायाह॥
॥ मेतेभ्यो ददातिजीवपितृकोपि॥ ॥जीवांतर्हितेपि। दातृप्रवर्तते एवपितृत्वर्स्या दिशेषविषयत्वात्॥ ॥जी देख
वपितृकस्य होमांतमनारंभो वा॥ कर्मस्यात्। कुतः। न व्यवैति जातेकर्षयः। यस्मान्नजीवमध्यवेते दानंजातुकेर्षयः
किमिति न व्यवैतो नजीवंतमतिददातीति श्रुतेः। नजीवंतमतिददातिश्रुवातरेषु श्रवणात्। अतो होमांतं कर्म स्यात्॥ ३

॥ यद्येवं अनारंभ एव श्रेयान् । कुतः । दानस्य प्रधानभूतत्वात् तच्च प्रधानाभावे गानां प्रवृत्तिरहिता । अतो अनारंभ
एवेस्व धार्यते । चतुर्दश्युपवासपक्षे अमावास्यायाः पूर्वाह्णे दर्शयागः । तत्र चापराह्णे पश्चात्सिद्धे पितृयज्ञः । अमावा
स्योपवासे पूर्वः प्राप्नोति तत्राभिप्रायमेव प्राप्तमेव आह ॥ ॥ पूर्वो वाग्ना पिंडपितृयज्ञः । पूर्व एव दर्शात् पिंडपितृयज्ञेन पश्चात्
कृत एतत् । अंगप्रतिपादकवाक्यात् । पूर्वेद्युः पितृस्योपज्ञेनि एणीयपालदै वैभ्यः प्रतनुतद्दति । अमावास्याया
मेव पूर्वो भवति । इदमेव विचार्यते । किं पिंडपितृयज्ञो दर्शांगं उतानंगमिति । किं तावत्प्राप्तं । अनंगमिति ब्रूमः ॥ ॥ प्रक
रणकालत्वलिंगानुग्रहवचनाभावाहिताग्निश्रुतिभ्योनंगं । प्रकरणभेदात् । प्रकरणपठितमंगं भवति । न चायं तत्प्रकरणे पठ्य
ते । किंच कालभेदात् । पूर्वाह्णेऽपराह्णे इत्यंगानां चैककालता भवति । अपि च लिंगं भवति ॥ यस्मिन् गृहीतः पौर्णमा
से भयज्ञेत पिंडपितृयज्ञेनेवामावास्यामवरुंधे आमावास्यामंतरेणापि पिंडपितृयज्ञं दर्शयति तच्चानंगत्वे उपपद्यते
अनुग्रहवचनं च पृथग्दर्शात् । कथमेषा पितृयज्ञो नंतरितो भवतीति । अथांगं स्यात् । कथमेषाममावास्यै हविर
नंतरितं भवतीमुक्ते दध्याचेस मावास्यानुग्रहेणैवानुगृहीतः । पितृयज्ञो । अनुग्रहवचनं च पृथग्दूपपद्यते । अपि चा

पू०

नाहिताग्नेरग्निक्रुतिर्भवति। अथानाहिताग्निना कार्य इति। अंगत्वेहि दर्शे अनसमृतिनक्रियेतात ततोप्यनंगमिति
॥ ॥ अंगं वा सममभिव्याहारात्। अथवांगमपि इष्टिर्द्वयस्य। कुत एतत्। सममभिव्याहारात्। समभिव्येकीभावे नाभिव्याह
रो वाक्यं वाक्यादित्यर्थः। पूर्वे द्युः पितृभ्योऽग्निः क्रियं तस्योपात्तदेवेभ्यः प्रतननं अयज्ञपेन विना न भवतीति तदर्थता
दर्श्यलक्षणं तु त्रोपकं। तस्मादंगमिति। यत्तु प्रकरणभेदादनंगमिति। प्रकरणांतरसमधीतमप्यंगं भवत्येव यथा प्रव
र्ग्यः। सौत्रामणी चेति। भिन्नकालमप्यंगं भवति। यथाग्निहोत्रार्थं मुहूर्तपालिंगं वचनं द्रष्टव्यं। अनुग्रहवचनं अर्थेवा
दें गवेषुपपद्यते। अथानाहिताग्निना कार्य इति वचनात्। तस्मादंगं पिंडपितृयज्ञ इति। पिंडपितृयज्ञः प्राकृतत्वाद
नुविहितः। इदानीमामावास्यमनुविधीयते॥ ॥ श्वो नोद्देतस्य दृष्ट्वा पर्णशाखां छिनत्ति शामीलीं वा पर्णं शमीं इषे त्वेमू ऊर्जे त्वेति वा
श्वः न उद्दे ता चंद्रमा इति ज्ञात्वा पर्णशाखां छिनत्ति। कुत एतत्। तदहः के दृष्टे पर्व संतीति वचनात्। अदृष्टे वा तु कु
त॥ अमावास्यायां अमावास्यया यजेतेति श्रुतत्वात्। पर्णः पलाशः॥ शामिली वा शमीमयी वेत्यर्थः। इषे त्वेमू ऊर्जे त्वे हेरंब
ति वा। तामाछिनत्ति पिसो ऊर्जे त्वेतिहि श्रूयते। न च अनयोर्मंत्रयोः करणत्वात् समुच्चयः॥ ॥ छिनद्मीति वोभयोः साका ४

सत्वात्॥ ॥छिनद्धीसुभाभ्यां संबध्यते। कुतः॥ साकांक्षत्वात्। उभयोः छेदने विनियुक्तत्वात्। तामाछिनत्तीषे

वोऽर्जे वेति॥ ॥संनमयामीति मंत्रांतरे। तत्कुतः। ऊर्जे वेत्यस्मात् पूर्वीति वचनात्। अतु मार्ष्टीति च प्रगुणीकरणात्

त्वं संत्रलिंगादेव मामं। आचार्येणानभिहितां एवं च सति द्वावपि मंत्रौ माध्यंदिन पाठः छेदने विनियुज्येते विक

ल्पेन। उत्तरत्वेनु रमाजेन एवाकालेव पाठात्॥ ॥ बहुलेपल्लाशामसु काष्ठां प्रागुदीचीमन्यतमां वा। अन्यत

मां इति वचनेन सर्वेदिग्विषयं प्राचीमाहर इति उदीचीमाहरतीति वचनात्॥ व्रतमुपैति॥ अनिर्वात कालस्य श

खा छेदनस्यावसरविधिस्मयेदमुक्तं। ततश्च व्रतोपायनीयाज्ञानोत्तरकालं छेदनमिति। तस्मात् प्रि...श्च प्रकरणा

विभागात्। सूचकारोपदेशात् पौर्णमासवदन्यदिति। व्रतग्रहणो नियमो माभूदित्याह॥ ॥यथोक्तं वा॥ मारभिवे

सांत्र दे ...वत्सेट ...तिवायव स्थेति। संसर्गश्च मेलनवः॥ वत्सस्य चोदिद्यमानत्वात् ...तिवत्स मु

पस्य ...नालिंगचा विविक्षितं। ...यमानत्वादे बा कोचि ...पदे ...वत्सा मिति। यदि वत्सः ...वः स्त्री विपये

पित्तदेतदुपपद्यते। तथा च पाणिनिः॥ ग्राम्यपशुसंघेष्वतरुणेषु स्त्री। इति स्त्री शब्दः साधुर्भवति। तरुणेषु पुंस्त्व

क॰ पू॰ ५ वइति। एवं च सति स्त्रीवत्सा अपि गावो गृह्यन्ते॥ ॥उपायवद्धेति चैके। मन्त्रे शेषं कुर्वन्ति। उपस्पर्शनं च पृथक्करणा
र्थं। उत्तरसूत्रात्॥ ॥देवो व इति मान्त्रणमेको व्याख्यातः शाखावेधोपस्पृशति। वत्सेन व्याहृयेति वचनात्। एकस्या
श्चोपस्पर्शने सर्वासां संस्कार इति। कृते एतत् मन्त्रे बहुवचनोपदेशात्। आप्यायध्वमघ्न्या इति। ततश्च वहिनीद
र्थे इमिं यत्र मन्त्रो विपरिणम्यत इति संप्रदायः। अपरे तु न्यायेन निगदवाद विपरिणाममिच्छन्ति। येवोपस्पृश्यते
तस्या एव संस्कार इति। बहुवचनं पूजार्थं। एता उस्रा उषसः केतुमकृतेतिवत्॥ ॥ऐंद्रं भवति माहेंद्रं वा। मन्त्रे हि
द्रष्टा वृत्र एव दृश्यते। स एव महेन्द्रो दृश्यत आह। माहेंद्रं वेति। अतश्चाके विकल्प्यः। तच्च वचनात्। ते के महेंद्राये
ति कुर्वन्तीति॥ ॥यजमानस्य पशून् निसंगन्य गारस्यान्यतरस्य पुरस्ताच्छाखामुपगूहति। ...गारे। तयोरन्यतर
स्य पुरस्तादुपगूहनाद्यजमानगृहेणां च पसुविशेषं करोतीति। विष इति। मूलतः शाखापरिवास्योपवेषं करोतीति
वचनात्। उपवेषनिष्पत्तौ च मन्त्रः। शाखायाः परिवासनं संस्कारः। ततश्च केवलायामाभिक्षायां तु ...मेव शाखा
परिवासनं। परिवासितया हि पयसोपाकरणमिति॥ ॥सांनाय्ये शाखासंयोगात् सांनाय्य एवोपवेषः। कृतः। शा हेरंब
खासंयोगात्। शाखापरिवास्योपवेषं करोतीति॥ ॥उपधानाद्युभयोः। वाशब्दः पक्षव्यावृत्तौ। उपधानार्थे वाद्युप ५

वेषस्योमयत्रूपप्रवृत्तिः। ततश्च शाखाभावे वारणो भवति॥ ॥ वसोः पवित्रमिति पवित्रमस्यां बध्नाति कुशौ। वसो
ः पवित्रमित्यनेन मंत्रेण कुशावेव पवित्रं बध्नाति शाखायां। ते चैते परिवासन पवित्रबंधने शाखोपगूहना
त्पूर्वं कर्त्तव्ये। अर्थादुपाये वा ध्यातेडुमुक्ता विरोधिर्थः सत्समरत्वादिति। पश्चात्तु परिवासनादौ क्रियमाणे समु
पगूहनमदृष्टार्थं स्यात्। दृष्टार्थता चास्याः शाखाया अनाशु इति। दृष्टे च सति न अदृष्टपरिकल्पना साध्वी।
अतः पश्चादुपगूहनमिति॥ ॥ त्रिवृद्द्वात्रिवृद्वैराण्यमभिधीयते। तां बध्नाति। वाशब्दो विकल्पार्थः॥ ॥ यवाग्वा
ग्निहोत्रहोमः संनयतस्त्वार्दरात्रिं तां रात्रिमिति वचनात् तेराजस्तूये पसमध्ये आमावास्ये न यवागूनियमः॥ ॥
हुतउपसृष्टाप्रवृत्तादित्याह। हुतेग्निहोत्रे दोग्धारमाहोपसृष्टां प्रब्रूतादिति॥ ॥ प्रोक्ते धोरसीति सृष्टाल्यादा
नं। उपसृष्टेति प्रोक्ते योग्यामतिप्रश्ने धोरसीति सृष्टाल्यादानात्तच्चाधिश्रयणार्थे। अतश्च वायव्ये पयसि अधिश्रय
णाभावादनादानं कार्यो पृथ्याच वपाश्रूपस्येर्यरादाने विपरिणामः धौरसृष्टाः पृथिवी सृष्टु इति॥ ॥ मातरिश्वनइत्य
धिश्रयति सृष्टाल्यां। वसोः पवित्रमिति पवित्रमस्यां करोति वा प्रावितिविकल्पः। तच्चैतद्धोतं प्रागुदक्ग्रहणे

क॰ पू॰ ६

।स्मार्ते हि ब्रह्मचर्यमंतरेणापि प्राप्नोसे वा प्रयोजनं तदपचारे श्रौतं प्रायश्चित्तं ॥ ॥ वाग्यतो दोहयस भूद्रेणादोहयती
ति कारितत्वादध्येषणा गां धुक्ष्वेति शूद्रपशुं दासा ब्रह्मक्षत्रियवैश्ययोरभ्यनुज्ञा ॥ ॥ स्क्षुत्स्यन्वारब्धे देवस्त्वेति सामि
च्यमाभिजपति। स्क्षुत्स्यन्वारब्धेय जमाने। देवस्त्वेसासिच्यमाने। देवस्त्विसासिच्यमानेजपत्यध्वर्युः ॥ ॥ कामधुक्ष
इति प्रश्नः। गां दुग्धवानसीति दोग्धारं पृच्छति ॥ ॥ प्रोक्ते साविश्वायुरित्याह। अभूमिति प्रोक्ते गोनाम्नि साविश्वायुरित्या
ह ॥ ॥ एवमितरे उत्तराभ्यां प्रतिमंत्रं। एवमितरे द्वे दोहयति। एवं शब्दश्च समस्तक्रियोपदेशः। अयं तु विशेषः। उत्तरा
भ्यां प्रतिमंत्रमभिरूयाति ॥ ॥ विसृष्टवागुत्तरा अमन्वारब्धो दोहयतीति वाक्यशेषः। अन्वारंभवाग्यमयोश्च प्रति
षेधात् जपेभवत्येव। उत्तरा दोहयती येतावसुक्ते। न ज्ञायते कियसोदुह्यतइत्यत आह ॥ ॥ यावत्स्वमधिकारात्
यावतः स्वागावस्कावयइति। कुतएततः अधिकारात्। अपरिज्ञानेसत्यधिकारी व्यवच्छेदकः ॥ ॥ त्रिसो वानित्या हेरंब
वात्। त्रिस्त्रो वा दुह्यते। त्रित्वेहि नियं बहुवचनं व्यवस्थितं। ननु च तु ह्या दावपि भवत्येवासत्यमेवं ॥ ॥ आदिसाम
र्थ्यात्। त्रित्वगतमेव बहुत्वमाद्रियते। उक्ते हि बहुत्वे ततः शास्त्रार्थ इति। किमित्युत्तरगतं गम्यते ॥ ॥ दर्शनाद्धा ॥ दस्य

तेचायमर्थो यथाबहुवचनाश्रवणेत्रित्वगतमेवोपादीयते। कृष्णाभौमाधूम्राआंतरिक्षाबृहंतोदिव्याःशब
लावैद्युताःसिध्मास्तारकाइति। पंच बहुवचनान्यत्र क्रम्यपंचदशाद्रश्येयाति। अर्द्धमासमासानांवा एतद्रूपंयस्
वदर्शनीयत्वंवदर्शनआलभमइति॥ ॥ परिसमाप्तनमानयति संपृचाशपरोतदापातुहेतत्रशेषेणेमेवमवस्य
ता। अतःप्राकृशाद्वस्यपूर्वकालवाचित्वात्सर्वेयद्गुतशेषं। सायंहोमशेषमिसर्यः। आंततत्कोति आतंचेरु
पंसचसंकोचेनार्थः। संकोचःकाठिन्यं॥ तस्मायंहोमशेषेणसुकरमिति। इदृश्येति चोपलक्षणंमहेंद्रस्या
पिमावात॥ माहेंद्रकेमहेंद्रायेतिकुर्वंतीति॥ ॥ सोदकेनापिदधायमन्मथेनविष्णुहव्यमिति। अथोदकेवृतो
तानेनपात्रेणापिदधातीति वचनात्॥ ॥ निधायवत्सापाकरणपूर्वंवेत। निधायेतुस्ययोवत्सापाकरणंपूर्वंव
त॥ तद्रूपयः। इंद्रपयोमावास्यायामिति॥ ॥ प्रातराग्नेयऐंद्राग्नश्चद्वादशकपालोऽसंनयतः॥ संलक्षउभय
शाच्युतआग्नेयोष्टाकपालइत्याग्नेयग्रहणं। अमावैनोद्यवसुद्वेसतीमुपक्रम्य। तस्मादैंद्राग्नोद्वादशकपाल
पुरोडाशोभवतीत्याह॥ तद्धेतदसंनयतः॥ ॥ निरूप्याज्यंप्रातर्दोहनमन्यस्मिन्। आज्यानिर्वापेसतेप्रातर्दोहन

क०पृ०
७

मन्यस्मिन्पात्रे कर्त्तव्यं। अन्यस्मिन्निति ग्रहणात्सायंदोहस्य तत्रैवातंचनं॥ ॥परिस्रावनांतं त्वा सायंदोहमा
हृत्य प्रातर्दोहं हरे॰ अथ यद्यपि वाभिघार्यो ह्यस्याभावनक्ति। प्रातर्दोहे हृते अथ यद्यपि वा सायंदोहाहरणाय यथासूत्रे हृष्टार्थ
ताभवति। अभिघारणं च पयसः। उभावनक्तीति प्राणदाति नेतदुभयोः॥ ॥घृतस्याग्रे च घृतौ श्रुतेः॥ अपन्याय्य
वाहुतिग्रहणं दध्नो हि पूर्वं क्रमइति। यदवद्यतीति तस्य इष्टेस्तस्य प्रथमं॥ ॥समस्य मार्जनं शाखापवित्रेण सह मार्ज
नात्तु पुनः शाखायामेव कर्त्तव्यं। मार्जनमात्र एव श्रवणात्॥ ॥इंद्राग्न्योरिति व्यूहनानुच्चयथादेवतम
न्यदिद्युक्तवाच्यमिततानसमाम्नायज्ञापनार्थत्वात्। अज्ञाप्यमाने समाम्नाये परादिनापूर्वोतन्यायेनइंद्राग्न्यो
रिंद्रस्य पूर्वव्यूहनशेषत्वेव प्राप्नोति तस्मात्सा धूक्तमिंद्राग्न्योरिति व्यूहनं॥ ॥सह शाखयाप्रस्तरानुप्रहरणस्य
निर्ज्ञीतकालत्वात् शाखापहरणस्य चाऽनिर्ज्ञातकालत्वात्प्रस्तरेण सह शाखां प्रहरतीति वाक्यार्थः॥ ॥परि
धिभिः सहोपवेषं जुहोजुहोमित्वेति मंत्रभेदाच्चकर्मभेदः ततश्चाग्नीदुपवेषं जुहोति पौर्णमासवदन्यदसंधः हेरंब
नच्चायमतिदेशः प्रकरणसाधारण्याद्धोमाणां। एवं चोभयत्रगुणकामहृत्तिरविरुद्धाद्दर्शयांस्ति विशेषः॥ ॥असधः ७

सोमयाजी संनयेत् । सोमयाजिनोनियमः ॥ ॥ कामादितरः । तस्मादथ सोमयाजी समेव नयेदिति ॥ ॥ त्रिंशतं वर्षा
णि दर्शपूर्णमासाभ्यां यजेत । तस्मादुत्त्रिंशत्तमेव वर्षाणि यजेतेति श्रुतत्वात् । दर्शपूर्णमासग्रहणं न कर्त्तव्यं । उप
क्रमादेवतत्सिद्धेः । कर्त्तव्यं वा । आनंतर्यात् सांनाय्यस्य तद्गुणकविषयतैव माभूदिति ॥ ॥ पंचदशदाक्षायणयाजी
। यद्युदाक्षायणयाजी स्यादथो अपि पंचदशैव वर्षाणि यजेतेति ॥ ॥ अग्निहोत्रमेव वाजुहुयात् ॥ एवशब्द इ
वार्थः । यथाग्निहोत्रं यावज्जीवं एवं दर्शपूर्णमासावपीति । उभयोस्तुल्यशास्त्रत्वात् । यावज्जीवमग्निहोत्रं जुहो
ति । यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति । दर्शपूर्णमासयोः सांनाय्यवतोरसांनाय्यवतोश्चानुविधानं सतोः इदा
नीं दाक्षायणगुणकयोः कर्त्तव्यं तत्र चपयस्याविधृते ॥ सा च दधिपयोभ्यां साध्यते । विकारत्वाच्चु धर्मादेतिदेशप्र
कता च विशेषादेशादुहो बाधश्चेति । तत्र तावदतिदेशविचारः क्रियते । यावद्धि सतीषु चोदनासु यागस्वं न प्रतिपाद्य
ते । सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः । ऐंद्राग्नमेकादशकपालं निर्वपेत्प्रजाकामः । अग्नीषोमीयमजमालभेतेति चैव

क॰ पू॰ माघासु किंयावदुक्तं निर्वापमात्रमालंभमात्रं च उत याग एत इति शब्दलक्षणत्वात्कर्मणो यावदुक्तान्येतानीति प्रा
८ प्रउच्यते ॥ ॥२॥ ॥ कर्मशब्दो द्रव्यदेवतायुक्तो यजतिः । कर्मशब्द आख्यातशब्दो व्यापारशब्दः । यो द्रव्यदेव
तायुक्तः स यजतिः प्रसेतव्यः । यागः प्रसेतव्य इत्यर्थः । पघपि यजतिर्यजिरिति च धातोर्निर्देशकः । तथापि तस्य द्र
व्यदेवतासंयोगाभावात्तदर्थ एव गृह्यते । द्रव्यदेवतायुक्तः कर्मशब्दो याग इति । कुत एतत्तु द्रव्यदेवतासंयोगात्
। यश्च द्रव्यस्य देवतोद्देशेन त्यागः स याग इति । द्रव्यदेवतायुक्तश्च कर्मशब्दो यागं दर्शयति मित्रावाहस्पस
चरुं निर्वपती सभिधाय तयोरुभयोर्वधंनाह मित्राद्बृहस्पतिभ्यामनुब्रूहि सावाव्या हमित्राद्बृहस्पती यजे
ति । प्रैषविशेषविधिपरिवाक्यं यागं दर्शयति । एकदेशस्थितमपि चालिंगं स्थालीपुलाकन्यायेन गमकं भव
ति न्यायस्य तुल्यत्वात् । तस्माद्यागा एत इति । यागेषु सत्सु किं यागमात्रभवस्तुत धर्मा अपि संतिते । तत्र किं पूर्णाहुति
का । उताग्निहोत्रिका उत दर्शपौर्णमासिका । उत ज्योतिष्टोमिका इति । अथ दर्शपौर्णमासिका एवेति ॥ किं तावत्प्राप्तं हेरंब
धर्माणामनाम्नानाद् धर्मका इति । एवं प्राप्ते विधीयते ॥ ॥ दर्शपौर्णमासधर्मा इष्टिपशुषु सामर्थ्यात् ॥ सामर्थ्यादियं ८

हेतुर्धर्मसत्तायां। तद्विशेषे च साधारणधर्मसत्तायां तावता एवमेता चोदनाः समर्था भवंत्यर्थवंत्यो भवंतीत्यर्थः। इ
तरथा सापेक्षाः सत्योनर्थिका एव स्युः। तत्कथं सौर्ययागेन ब्रह्मवर्चसं भावयेदित्यपरिपूर्णे वाक्याय च्चु नाम
अर्थापूर्णतदध्याहारेण वानुषंगेण वा पूरयितव्यं। नहि वेदे मात्रामात्रस्याप्यनर्थक्यमिष्यते। तेनात्र विधेयं तो
नुषक्तव्यो वाक्यपूरणापानर्थक्यं माभूदिति। स च दर्शपौर्णमासिकः सामर्थ्यादेव स एवात्र शेषीभवितुं सम
र्थः। व्यक्तचोदनाचोदितत्वेन निर्वपतिसंशब्देन न च प्रतीयमानत्वात् नान्य इति विधेयं तानुषंगेण च धर्माणामनु
षंग इति। दर्शपूर्णमासधर्मा इति सूत्रितं इष्टिषु यथा श्रुतिषु इति च। इष्टिषु पशौ च सिद्धत्वं पश्चात्तरेषु ह्यग्नीषोमीय
धर्मप्राप्तिं वक्ष्यति। अग्नीषोमीयदर्शनादिति॥ ॥ दर्शनाच्च॥ दर्श्यते वायमर्थो यथा दर्शपूर्णमासधर्मा इष्टि
पशुषु प्रवर्त्तंत इति सावित्रीमिष्टिं निर्वपतीति प्रसत्याह तस्य प्रयाजेषु तायमानेषु ब्राह्मणो वीणायो दक्षिणत
उत्तरमंद्रामुदाघ्नन्त्स्विष्टिकृतः स्वयंर्ते: संस्मृती गाथा गायतीति गाथागानविधिपरे वाक्ये प्रयाजान्दर्शयति। तथा पशोः स
उत्तरमाघारमाघार्य सर्वस्य यज्ञांगं स्रुचौ परिवेस्य जुह्वा पशुं समनक्ति इति पशुसमंजनविधिपरे वाक्ये उत्तराघा

क॰ पू॰ रं दर्शयति। एवं सर्वोष्विष्टिष्वेवानुमानिकवचनेन धर्मप्राप्तिरभिहिता। इदानीं तदपवादवचनेन प्रसक्तस्य छेदेन धर्म
९ प्राप्तिरभिधीयते॥ ॥ वैश्वदेवधर्मा श्चातुर्मास्येषु वचनप्रवृत्तिभ्यां। वैश्वदेवमिति चातुर्मास्यानां प्रथमं पर्व त
स्य धर्मा उत्तरेषु पर्वसु प्रवर्त्तते। कुतः। वचनात्। वचनादिति हेतुश्चायमुपदेशश्चातत्तश्च यत्रैव वचनं तत्रैव
प्राप्तिः। प्रतिपर्व वचनं भवति। अथैतान्येव पंच हवींषि भवति तानि चाग्नेयादीनि वैश्वदेविकानि पंच चोधं
ते। तेषां चोपक्षीणत्वात्तद्धर्मकाणीति गम्यते। धर्मप्रवृत्तिं च दर्शयति शुनासीरीये। अथैतान्येव पंच वा ध्यंते तेषां चो
पक्षीणत्वात्तद्धर्मकाणीति गम्यते। धर्मप्रवृत्तिं च दर्शयति शुनासीरीये अ॰ अथैतान्येव पंच हवींषि भवंतीत्य
भिधाय तस्याद्धृन्नोपकिरं पुत्तरवेदिं न गृह्णाति पषदाज्यं न मंथं यग्निमिति प्रतिषेधति प्रतिषेधश्च प्राप्तिपूर्व
को भवति। अप्राप्तत्वाच्चोत्तरवेदिप्रतिषेधोनुवादकः॥ ॥ सोमसोमाच्चावभृथे साम प्रतिषेधात्। सौमिकादव
भृथाद्वारुणप्रघासिके धर्मप्राप्तिः। कुतो वचनात्। वचशब्दो नेष वचनमनुत्तप्यते। उच्यते। नेन शब्देनेति वचनं। हेरंब
नामधेयमवभृथ इति। सामप्रतिषेधाच्च सौमिकादवभृथान्नामसामान्येन साम गानं प्राप्तं तत्प्रतिषेधो विधीयते नाप्रा ९

संप्रतिषिध्यते। तत्रानसामगीयतइति॥ ॥ कृणवत्पुश्रेषनमंत्रोपदेशात्। कृणापामनक्रियावद्बुधिरपासनक्रि
या। तयोरेवास्वकप्रयोगेति वचनेन प्राप्नोति। सा च प्रतिषिध्यते। न मंत्रोपदेशादित्यविशेषं क्रियोप्राप्तिः स्यान्नमं
त्रउपदिश्यते। उपदिश्यते च रक्षसां भागोसीति। तस्मात्तावन्मात्रमेव भवति। अत्रोपक्रियाविषयं वचनमित्या
शंकाविनिवृत्यर्थमुक्तं॥ ॥विज्ञाये लौकिकमयुक्तत्वात्। विज्ञायः संज्ञायउच्यते। यथा ज्यदि हेषु सामसु अ
ग्निमुपसमाधाय स्तुवंतीति। किं लौकिकमग्निद्रव्यं उत वैदिकमिति। अत्र लौकिके गृहीतव्यमयुक्तत्वात्। ह
तरस्यवविशिष्टकौर्यसंयोगादिति। नन्वन्येवायुक्तत्वादित्यभिहित एवायं न्यायः। प्रकरणसमधीतविषयतो
तस्येति। अस्य पुनरप्रकरणसमधीतविषयतेति योगात्तरारंभः। दर्शपूर्णमासधर्माः सौर्यादिष्वपि भवंतीत्यत
दुक्तं। दर्शपूर्णमासयोश्च षड्प्रधानानि। तच्चैतद्विंसतो। किं परस्मिन्कस्मिंश्चिद्वृत्ते तेप्रधानेयतः कुतश्चिद्वर्मपरिमा।
सिरुत नियमकारिकारणं किंचिदस्तीति। किं तावत्प्राप्तं नियमकारणाभावादनियमइत्येवं प्राप्तउच्यते॥ ॥विधि
विशेषः कर्मण्येकद्विशब्दपरिमाणद्रव्यदेवतागुणसामान्येभ्यः। विधेर्विशेषो विधिविशेषः। वैक्षते प्रधाने

पू० १० कत्वादिभिर्विशेषण धर्मप्राप्तिः। यथा सौर्ये देवतैकत्वेनावांतरसामान्येनाग्नेयधर्मप्राप्तिः। सत्यपि व्यक्तत्वेनि
र्वपतिसंज्ञत्वेनैव नाग्नीषोमीयादिभ्यः सादृश्यं हि प्रतीतिर्भवति। प्रतीते न च धर्मसंबंधः दृश्यते। द्विदेवतत्वाच्चा
ग्नावैष्णवे अग्नीषोमीयविध्यंतः। द्वित्वसामान्यादैंद्राग्नस्यापीति चेत्। नाक्षरपरिमाणात्। उभौ हि पंचाक्षरावि
ति मारुते चक्षरपरिमाणादैंद्राग्नविध्यंतः। द्रव्यसामान्येन च विध्यंतप्राप्तिः। यथा पुरोडाशे पौरोडाशिकः।
सांनाय्ये च सांनाय्यस्य देवतासामान्येन च धर्मप्राप्तिः। यथाग्नेये आग्नेयस्यानंतु चैतद्वाच्यं। एकत्वेने
वगतार्थत्वात्। वाच्यं वा सौम्ये चरावग्नीषोमीयधर्मपरिप्रापणार्थः। तत्र हि सोमोऽप्यस्तीति। इंद्रसद्भावादैंद्रा
ग्नविध्यंतः ऐंद्रे पुरोडाशे। तदेतदनुदाहरणं। न ह्यत्र देवतास्मात्सामान्यमस्ति समुदायात्तद्धितोत्पत्तिः। कस्त
र्ह्यत्र समाधिः। वक्ष्याति। द्रव्यदेवताविरोधे द्रव्यस्य समवायादिति। तादर्थ्येन देवतासामान्योपन्यासः। गुण
सामान्येनापि विध्यंतप्रवृत्तिरिष्यते। यथा प्रतिकाममाग्नेये पौर्णमास्यां क्रियमाणे पौर्णमासाग्नेयविध्यंतः। हरव
अमावास्यायाममावास्याग्नेयविध्यंत इति। कालो ह्यत्र गुण इति। तदेतदपरे अनुदाहरणमाहुः। नहि कालो गुण १०

इति श्रूयते वस्तुतः सगुणं हि कर्मकारके विधीयते। इति गुणसामान्ये तर्हि किमुदाहरणं। अस्ति वैश्वदेवो द्वादशा
कपालस्तत्र वैश्वदेवत्वानेकत्वसामान्यादेर्द्वयाप्तविध्येते नाग्नीषोमीयविध्यंते नचानियमेन भवितव्यमित्येवं प्रा
प्त आह॥ गुणसामान्यादेर्द्वयाग्नविध्यंतः उभौ हि द्वादशाकपालाविति॥ द्वादशपरिमाणत्वेनोदासीनमेवा॥
अथ द्रव्यदेवताविरोधे किं द्रव्यसामान्ये न विध्यंतनियमो स्त्वड उत देवतासामान्येति॥ यथा वैश्वदेवेनवकपा
ले द्रव्यसामान्येन पौरोडाशिको देवतासामान्येनोपांशुयाजविध्यंत इति। तत्रानियमकारिकारणाभा
वादनियमे प्राप्ते आह॥ ॥नियमो द्रव्यदेवताविरोधे द्रव्यस्य समवायात॥ अत्र नानियमो द्रव्यसामा
न्येन पौरोडाशिको विध्यंतो नोपांशुयाजस्य द्रव्यदेवतयोरुभयोरपि विध्यंतयत्पुरस्तात्पकल्वे द्रव्यमे
वबलीयकृत एतत्॥ सामवायात॥ द्रव्यं हि यागे समवैति। तद्धि सद्यमानं यागमभिनिर्वर्त्तयति देवता-
तूद्देशेनोपकरोति। तेनासौ विप्रकृष्टेति॥ संनिकृष्टविप्रकृष्टयोश्च संनिकृष्टे संप्रत्ययः॥ ॥अथवा समवा
यादिति द्रव्यमेवाविशेष्यत्वेन हृदि समवैति। देवता विशेषणं। विशेष्यविशेषणयोश्च संनिकृष्टे संप्रत्ययः॥ ॥अथवा।

।।का॰पू॰ ।समवायादिति द्रव्यमेवविशेष्यत्वेन हृदि समवेति देवताविशेषणत्वेन।विशेषणविशेष्ययोश्चाविशे
११ ष्ये संप्रत्ययः।। ।।आमिक्षायामुभयोस्तन्निर्वृत्तेः।आमिक्षायामुभयोर्दधिपयसोर्द्धर्मप्राप्तिः।ताभ्यां ह्यसौ
निर्वर्त्यते।। ।।नैकचोदनात्।।नैतदस्ति।यदुक्तमुभयोर्द्धर्मप्राप्तिरिति।।किंकारणं।एकचोदनात्।।एका
हीयं चोदना मैत्रावरुण्यामिक्षेति।सा चैकास्तीनोभे विकर्तुमर्हति।अतोन्यतरस्य विध्यंत इति।। ।।द
ध्नः संधानात्।।एकाहीयं चोदना मैत्रावरुण्यामिक्षेति।सा चैकास्तीनोभे विकर्त्तुमर्हति।अतोन्या
तरस्यविध्यंत इति।। ।।९ दध्नः संधानात्।।दध्नो हि विध्यंतः प्रवर्त्तते।संघातत्वसामान्यात्।। ।।पयसस्त
द्रवात्।पयसो वा तत्त्वविध्यंतः प्रवर्त्तते।कुतस्तद्रवात्।ततो ह्यामिक्षा भवति घनीभावयितुं दध्यानी
यते।अथवा तद्रवादिति तद्रसस्य भावात्।आमिक्षायां मधुरं पयो मधुरा चामिक्षा।।पक्षो देवतासामान्या
दग्नीषोमीयविध्यंते प्रास आह।। ।।पक्षोः सान्नाय्यस्य तदुक्तं।। ।।पक्षो सांनाय्यस्य विध्यंतः।तदुक्तं द्र हेरंब
व्यदेवताविरोधे द्रव्यस्य समवायादिति।।ननु नैवात्र देवतयोर्विरोधो विद्यते।पशुद्रव्यस्य चोदितत्वात्। ११

सयां इतरेतरप्रभवत्वेन पशुद्रव्ये प्रतीते सांनाय्ये प्रतीतिर्भवति ॥ प्रतीत्याचार्यैर्धर्मसंबंध इत ॥ सांनाय्या
धर्माणां पशुद्रव्यं पर्युपस्थापकं देवता पुरोडाशिकानां ॥ अतो द्रव्यदेवताविरोध एवायं ॥ ननु तेनैव गता
र्थत्वादवाच्यमेतत् ॥ न तत्राव्यवहितं द्रव्यं । इह पशुद्रव्येण व्यवधानादारंभः ॥ ॥ प्रायश्चित्तश्रुतेश्च ॥ ॥
पशुं स्रवा चेत्रवेत्सांनाय्ये स्रवाताम् अभिमंत्रयेतेति पशुत्वेन पशुस्रवां दर्शयति ॥ सा च सांनाय्यस्य विध्यंते घट
ते । ननु विपरीतमेतत् श्रौतं लिंगं ॥ सांनाय्यस्य विध्यंते हि समतितदुःस्रवा स्कंद्याभिमंत्रणं पशुस्रवायामाप्नोत्येव
। विधाने तु सुतरामप्राप्तिर्गम्यते । मसं सांनाय्ये च प्रधानस्य श्रुतिः । पशुत्वानुपसज्जनभूतस्योदकस्येति
। तेन द्रव्यान्यत्वात् पुनरुच्यते । संघातत्वसामान्यात् स्यात् वैश्वदेवं दध्नो विध्यंते ॥ प्रासे आह ॥ ॥ पयसः कालांतं
तर्ये धर्मानुग्रहेभ्यः ॥ पयसो वा विध्यंतः प्रवर्त्तेत एककालत्वात् हि पयसः । पशुत्वेश्च । यदा वै योषा रेतो धत्ते
थ पयो धत्त इति तथा यदा पशुर्जायते ऽथ पयो जायत इति । अथ वा सद्यः कालः पशुः पयो पि सद्यः का
लमेव । अनंतरं च पशुत्वेः पयः । दधि तु पयोवस्थया व्यवहितं । अतः आनंतर्यात् पयसो विध्यंतः । धर्मानुग्रहश्च

क॰ पृ॰ भवति। पथः पात्राणां प्रोक्षणादयो धर्माः प्रवर्त्तते। न दध्नः। तेषां चानुग्रहः। कृतो भवति। प्राकृतं धर्मजातं वि
१२ कृतिषु चोदकेन प्राप्नोतीत्युक्तं। ततो ध्यहकालवृतायामपि प्राप्तायामिदमाह॥ ॥सद्यस्कं कारात्कृस्मि
॥कारात्त्वित्सिसद्यस्कं विकृतीनामिमेनो यद्‌ध्यासोमेन पशुनाग्रयणेन वा यक्ष्यमाणः स पौर्णमासीमामावा
स्यायां वा यजेतेति वचनात्॥ ॥अनुवादः पूर्वस्येति वान्स्यवादरी॥ वान्स्यवादरिस्थ्य वान्स्यबादरी। ता
वाहतु। विकृतिविषयत्वेन पौर्णमासी वामावास्या वोच्यतेति च प्रवृत्तितोपि चोदकेन प्राप्त एव॥ अतोनु
वादोयमिति। स्थितता वदपर्यवसितमन्यदतराचिंत्यते। यन्नाम प्राकृतस्य द्रव्यस्य कार्ये वैतत्तमन्य
द्रव्यांतरं विधीयते। यथा मौद्गं चरुं निर्वपेच्छ्रिये श्रीकाम इति॥ किं तत्प्राकृतद्रव्यस्य धर्मं लभते उत न ल
भत इति। किं तावत्प्राप्तं व्रीहीन्प्रोक्षति व्रीहीन्नवहंतीति व्रीहिसंयोगेन श्रुता धर्माः कथमिव मौद्गेषु भवि
ष्यंतीत्यत आह॥ ॥स्थानापत्तेद्रव्येषु धर्मलाभो विप्रतिषिद्धः। यद्धि कृतद्रव्यं प्राकृतकार्योपन्नं भवति त हेरंब
त्तत् धर्मान्लभते। कुतः। कार्योपत्तेः। प्राकृतस्य हि द्रव्यस्य धर्मसंबंधो पूर्वप्रयुक्तो न स्वरूपप्रयुक्तः। आ १२

नर्थक्यात्। अपूर्वसाधनविशेषकारितो ह्यसौ। एवं चवैकृतेपि सोस्तीति प्रवर्त्तत एव वित्तत्तं द्रव्यं प्रा
कृतकार्यापन्नं तद्धर्मैर्युज्यत इति युक्तं। तेन तन्मंत्राभिधानमपि लभते। इदं तु संदिह्यते। किमूहीतेना
भिधानं कर्त्तव्यमुतानूहितेनेति। किं तावत्प्राप्तं। अर्थबाधो मा भूदिसनूहितेनेति प्राप्ते आह॥ ॥यथार्थ
मूहः श्चोदिते॥ ॥चोदिते वैकृते प्रधाने द्रव्ये मुतानूहितेनेति। किं तावत्प्राप्तं। अर्थबाधो मा भूदियनूहि
तेनेति प्राप्ते आह॥ ॥यथार्थमूहः श्चोदिते॥ ॥चोदिते वैकृते प्रधाने द्रव्ये यथार्थमूहः कर्त्तव्यः। यथा
यथा तमर्थं प्रकाशयति। तथा तथोह्यते। यत्कारणं प्रकृतौ तेन मंत्रेण यागसाधनं द्रव्यमभिहितं। विकारे
पिहितेन तदेव कर्त्तव्यं। न चाविपरिणतरूपः शक्नोति कर्त्तुं। इत्यथोह्य परिणम्यते। प्रकृतावनेकपत्नीके
यागे पत्नीशब्दस्य षिपुरिणामे प्राप्ते आह॥ ॥न प्रकृतावपूर्वत्वात्॥ न प्रकृतौ विपरिणामोस्ति। अपूर्व
त्वात्प्रकृतेः। न हि प्रकृतेरन्या प्रकृतिरस्ति॥ यद्धि क्रियेत। विकृतौ तु प्रकृतिवद्भावाद्धि परिणामः॥ प्रकृतिव
द्धिह्रिसतिः कर्त्तव्ये यत्नेनाशेषधर्मपरिप्राप्ताविदमाह॥ ॥विकृतौ वचनार्थलोपविरोधेभ्यो प्रवृत्तिः॥ विस

का०पू० तौवचनाऽप्रवृत्तिर्भवति। यथापि तृपङ्क्ते न होतारं प्रवृणीते॥ नार्षेयमिति। अर्थलोपादप्रवृत्तिर्भवति। यथासु
१३ द्रुघ्ववधात्तस्य। विरोधादपि न प्रवर्त्तते॥ यथाचरोरुपेषणमिति। कृमितावदेवदेवविकृतौ न प्रवर्त्तते॥
नेत्याह॥ ॥परार्थोऽन्त्येस्तदभावेऽभावः॥ ॥परस्यार्थे निष्पद्यमाने यदुत्पन्नं तस्य परस्याभावे तस्याप्य
भावो भवति। यथा सान्नाय्यस्याकणापासनस्य। परार्थोत्पन्नस्य पराभावेऽभावे प्राप्त आह॥ ॥चोदिते तु वा
भावः॥ ॥परार्थो सत्तावपि भवत्येव॥ अत्रोदनाभावे ति। यथा यूपशकलेन गृहं संमार्ष्टीति यूपाभावेऽपि श
कलमात्रं गृह्यते। गृहसंमार्गार्थो शिष्टत्वादुत्तरमुच्यते। पौर्णमास्याममावस्यायां वा यजेतेत्यनुवादोऽयमित्युक्तं
तत्र प्रतिविधीयते॥ ॥नाविपक्षेऽक्रियास्युः समभिव्याहारात्। किंचिद्धि गतं पक्षस्येति विपक्षः प्रतिपद्यते
।तत्र च वैकल्पिकः क्रियानस्युः कृते हि पक्षेति एव स्युः। कुतः पौर्णमास्याममावास्यायां वास्यायां वा यजेतेति वच
नात्। तानन्तरमयमनुवाद इति। नानुवादः। अनुवादे हि पौर्णमासीशब्देन गौण्याद्रूपा प्रतिपत्तिर्लक्ष्यते। तत्र श्रु हेरंब
तिः परित्यक्ता भवति। न चैतद्युक्तं यल्लक्षणानुरोधेन श्रुतिर्वाध्यते। अपि चानुवादे प्रवृत्तिविशेषकरत्वादनर्थ १३

कसोमस्यचैतदेवकालविधानं। यद्रक्ष्यासोमेन पशुनाग्रयणेनयक्ष्यमाणः सपौर्णमास्याममावास्यायां
वायजेतेति। नह्यन्यत्रसोमस्यपौर्णमास्यमावास्येविहिते। अतोपिनानुवादः। दर्शपूर्णमासयोःसान्नाय्या
वतोरनुविधानक्षतमिदानींदाक्षायणयज्ञोनुविधीयते॥ ॥३॥ दाक्षायणयज्ञः प्रजापश्वन्नपत्रास्काम
स्यादाक्षायणयज्ञइतिकर्मणोनामधेयाद्द्रव्यगुणसंस्कारेष्वप्रसिद्धत्वात्॥ तस्माद्दाक्षायणयज्ञोना
मेतिवचनात्॥ सचप्रजापश्वन्नयशस्कामस्यभवतिपर्यायेणचयोगसिद्धिः॥ नहिकामानांयुगपदु
त्पत्तिसंभवः॥ ॥नामफलगुणयोगात्कर्मांतरं॥ नदर्शपूर्णमासाविति। कुतः॥ नामान्यत्वात्॥ अन्यद्धिना
मदाक्षायणइति। नामान्यत्वेचान्यप्रतीतिर्भवति। यथादेवदत्तादन्योयज्ञदत्तइति। फलान्यत्वाच्च॥ अन्य
द्धिफलंश्रूयते। प्रजादिफलान्यत्वेचफलिनोन्यत्वंभवति। गुणान्यत्वाच्च॥ गुणान्यत्वंचदृश्यते। मैत्राव
रुण्यामिक्षेत्येवमादि। गुणान्यत्वेचगुणिनोन्यत्वंगम्यते॥ अतःकर्मांतरमिति॥ ॥गुणविधानंवासंनिधिसं
पद्वचनाभ्यां॥ अथवानकर्मांतरं। तावेवगुणविशिष्टौदर्शपूर्णमासाविति॥ कुतएतत्॥ संनिधेः दर्शपू

क॰पू॰ र्णमासौ हि प्रकृत्या ह। तस्माद्दुर्विर्दं ज्ञातमेव वर्षाणि यजेते त्यभिधाय धुदाक्षायणयज्ञीस्याद्यो अपि
१४ पंचदशैव वर्षाणि यजेते ति। संनिहिते च तत्स्वलीति भवति। तथा च संप्रदृचनं। अत्रैव सा संपन्नं प्रद्यते
इति। यदि तदेव कर्म तदा साभ्यासे योगे स्त्रिंशत्संपत्सं च दर्शाभिवर्षैः संपाद्यते। यत्तु नामांतरं वादिति
।भवत्ये कस्यापि नामांतरं वा हस्तः। कृष्णः पाणिरिति। कर्मांतरं वा। चूनामान्यत्वे। ब्राह्मणपरिव्राजकवत।
फल्गुणाश्रयं। गुणान्यत्वे पिचवनगुणानोन्यता। नाहि देवदत्तस्य भ्रान्त्या दिनादिनान्यत्वं भवति। तस्मात्तदेवे
दं कर्म गुणविस्तृतमिति प्रयोजनं। दर्शपूर्णमासयोजनं ६ दर्शपूर्णमासयो राक्रिया॥ ॥अग्नीषोमीयः
पौर्णमास्यामैद्राग्नो मावास्यायां॥ क्रियत इति वाक्यशेषः। एवं श्रूयते। पूर्वे धुरग्नीषोमीयेण यजते पौर्ण
मास्यां॥ तथैंद्राग्नेन यजते ऽमावास्यायामिति॥ सान्नाय्या वसातः। त्यान्नाय्या शब्दो यागार्थे दधनिपय
सि च वर्तते। तच्चानोभयमुभयत्र भवति। अमावास्यायां हि पयस्यो च्यते पौर्णमास्या पुनराग्नेयः पुरोडा हेरंब
शो भवत्यैंद्रं सान्नाय्यमिसेता वदेव। उभयरूपेष्वभयत्र प्रवर्त्तमाने सत्यथ पातराग्नेयः पुरोडाशो। १४

थैतावेवमित्रावरुणौ द्वे देवते इति देवताद्वित्वं नोपपद्यते। उभयरूपे हीद्रोपि प्राप्नुयात्। तस्माद्विभागेन संभाज्य
व्रतप्रातरेवंचोपांशुयागो न भवति॥ ॥अमावास्यायापूयस्यामैत्रावरुणी॥ तं चैव दोहनं। दधनिवादोह
नं॥ ॥श्रृतेवादध्यानयति॥ ॥वाजिनंनिषिच्यात्करं करोति। वाजिनमवसेचनं मुच्यते। तस्येचयागसंबं
धाधाधर्मा: प्रवर्त्तते। वेधामासादने प्राप्ते उत्करद्रमुच्यते। नचात्र वेदिधर्म्मा: प्रवर्त्तते स्वरूपप्रयुक्त
त्वात्॥ ॥अनाज्यलिसंवा। तत्र स्रुचाभिघारस्य विकल्पः। अनाज्यालिसंनिषिच्येति वचनात्। ततस्त्रुप्रा
णदानं भवत्येव॥ ॥प्रहस्यचरणं तेन चरति विमुच्य वा स्रुवौ॥ एवं हि श्रूयते॥ ॥बर्हिरवसिंचनत्क्ताति तरु
षभेपुरेतोदधातीति श्रुः। ग्रहणं च यथा कथंचित्॥ नस्रुवेणा। अवघतीयश्रवणात्। अपन्यायश्चावसे
क इति श्रुतिग्रहणं॥ ॥वाजिभ्योनुवाचयति। पूर्वं अनुवाचनं माभूदित्यत उच्यते॥ ॥प्रतिव्रषकुरु८ कुला
वाजिनद्रोषेण दिशोव्याघारयति दिशः इति प्रतिमंत्रं प्रदक्षिणं पुरस्तात्प्रथमं। वाजिनद्रोषं च स्रुच्या। प्रद
क्षिणग्रहणं च श्रौतान स्मार्त्ती अतस्तदुपचारे श्रौतमवपायश्चित्तं॥ ॥उत्तमाभ्यां॥ मंत्राभ्यां॥ ॥मध्ये

क०पू० पूर्वार्द्धं च। व्याघारणं॥ स्वाहाकारः सर्वत्र साकांक्षत्वात्। साकांक्षत्वे तो क्रियापदाभावत्। अतः स्वाहा
२५ कारविधानं मंत्रांश्च यथाश्रुता एवान चतुर्थ्यंतेन प्रयोगः। सुपां सुपो भवंतीति चतुर्थ्यर्थे एव प्रथ
मा। एवं च समिधज्याहो मेपि यथाश्रुता एव मंत्राः चिंत्तं च विलिख्येति न च तुर्थ्यंतेन प्रयोगः॥ ॥ शेषमु
पहूय स्विष्टयामंत्र्यामंत्र्य भक्षणमुपहूत इति प्रसूतः। उपहूय स्विष्टया मंत्रणं प्रसृष्टिवा प्रसूत इत्युन्नी
तः। विप्रसृष्टेनो मभिरामंत्रणे मासि॥ ॥ युक्तनामभिर्विशाह॥ युक्तनामानि होत्रादीनि। एवं हि श्रूयते
। तद्रूपं चैव भक्षयंति होता चाध्वर्युश्च सेवमादि। अधिकारमुपजीव्याह॥ सोमे चासोपहवभ
क्षणं कर्तव्य। नोनु पहूतः सोमः पातव्य इति वचनात्॥ ॥ साधारणेषु वा सामर्थ्यात्। एवमनुज्ञाव
चेनामर्थं वदन्ति इदानीं भक्षमंत्रानाह॥ ॥ आतूनो वाजिनामि सेवमादी वाक्यभेदाच्च विकल्पः
इदानीं भक्षयितृनाह॥ ॥ होत्रध्वर्युब्रह्माग्नीध्रयजमानः। भक्षयंतीति वाक्यशेषः॥ समासोक्तावपि हेरंब
हि क्रमो यमेवाश्रयितव्यो येन यजमानस्य प्राथम्यमुच्यते॥ ॥ प्रथमो भयतस्तु यजमानः प्रथमो वेति २५

स्कृत॥ प्रथमोनोभक्षयतीतिउभयतस्त्विति प्रथमपक्षेउत्तमोपिभक्षयेत॥ अथो अच्युत्तमइतिवचनात्॥
॥दाक्षायणंवादक्षिणा॥ दाक्षायणंसुवर्णमुच्यते॥ अन्वाहार्योवेतिविकल्पः॥ ॥संवत्सरंवायजेत॥पं
चदशवर्षाणीत्युक्तमेव॥ संवत्सरश्चात्रसावनः परिगृह्यते॥ अत्रापिसैवयागसंपत्कल्प्येत॥ सावसा
वनउपपद्यते॥ नचाद्रुमसद्इति॥ ॥मार्दसरस्वन्तेतमूत्रक्षतवासारं भिवर्जयेत॥ अहनिमांसमैथुनेव
र्जयेदितितत्कर्मणिवर्तमानिद्रष्टव्यं॥ अहनीतिवचनात्॥ एतत्पुनरादर्शप्रयोगादंतरालधर्मोवच
नसामर्थ्यादितिदर्शपौर्णमासप्रकरणएवकाम्याआग्नेयआम्नातः॥ यत्कामोहवाएतेनयज्ञेनयज
तेस्मैकामःसमृध्यतइतितंचप्रसक्तोपांशुत्वविधानं॥ उपांशुतस्येदेवतायैयजतियस्यादृष्टिंनिवे
पतीतितत्तदनुविधानप्रसंगेनयस्ययस्योपांशुत्वंतस्यतस्योच्यते॥४॥ ॥उपांशुकाम्यदेवताःका
म्येकर्मणिदेवतानांउपांशुत्वंभवति॥ देवताग्रहणंनकर्तव्यंाचरणत्वात्सर्वदेवतान्यत्रैमुक्तत्वात्
उपांशुत्वस्य॥ एवंवेद्व्यक्तचोदनादेवताश्चेवोपांशुत्वानाव्यक्तासुसोमविकारेष्वितिदेवताग्रहणंसो

का० पू० त्रामण्यं तर्हि व्यक्तत्वादुपांशुत्वमस्तु ॥ नैतदेवं तंत्रभेदस्तत्रापि एकतंत्रे वोपांशुत्वमिष्यतां चार्याभिप्रा
१६ ॥ योयेनैंद्रवाय्योर्धर्मयोरुपांशुत्वं विदधातीष्टिषु वा एवं राजसूयेष्वनुमत्यादिषु नैवोपांशुत्वं तंत्र
भेदात्तत्प्रजाकामवैश्वदेवे तर्ह्यस्तूपांशुत्वं व्यक्तत्वादेकतंत्रत्वाच्चोदनैकत्वात्काम्यत्वाच्चातया
पंचबिले नैतदेवं नहि तत्र काम्यतयैवोपात्तिरिति तेन यत्र व्यक्तत्वं चोदनैकत्वं चैकतंत्र्यं च काम्या
र्थं चोपात्तिस्तत्रैवोपांशुत्वं यथा मित्रविंदायां ॥ आह च ॥ व्यक्तत्वे चोदनैकत्वे तंत्रैक्ये यत्र कामना ।
तादर्थ्येनैव चोपात्तिस्तत्रैव स्यादुपांशुता ॥ ॥१॥ आग्रयणे वैश्वदेवः ॥ उपांशु भवति ॥ ॥ एककपा
पालश्चावारुणाः वरुणवर्ज ॥ ॥ प्राप्तः ॥ उपांशु भवति तस्माद्धविः प्राजापत्यं यज्ञे क्रियत तदुपांश्वेव
तत्क्रियत इति वचनात् ॥ ॥ सावित्रश्चानुमोक्ष्येषु ॥ उपांशु तत्रैवं वैश्वदेवी । पयस्या ॥ ॥ वायव्यं पयःन
पुंसकलिंगोपदेशात् यवाग्वां तर्हि न प्राप्नोति प्रास्यूति यागधर्मत्वात् नहि द्रव्यधर्मोयं ॥ अपूर्वे प्रयुक्त हेरंब
त्वात् ॥ दर्शोयति वपर्वाणि प्रकृत्य तेषां वैनतुर्णां द्वयोस्त्रीणित्रीणि हवींषि ष्यानिरुक्तानि भवंति द्विद्विद्वयो । १६

रितिवैश्वदेवसुनासीरीपयोः स्त्रयाणामनिरुक्ततां दर्शयति। तस्माद्यवाग्वामप्युपांशुत्वं। तनु हवी
र्द्दिषि दीक्षणीयां प्रायाणीयातिथ्या देवता देवसूदेविका हवींषि। उपांशु भवंति। दाक्षणीया
दिषु देवताग्रहणं वाग्गं तपसार्थी सह प्रधानेन दीक्षणीयादेवांगं तेन मा भूदिति॥ ॥वायव्योग्नो
मैत्रावरुणीच। अप्स्वावेव॥ ॥ऐंद्रः सौत्रामण्यां प्रथमो वायोधर्मस्थ्येवमुपांशु॥ ॥आग्नेयं प्रतिका
मुमाहरेत। आग्नेयं हि प्रत्तयश्रूयते। सोस्मै कामः समृध्यते यस्मै कामायेष्टिर्निर्वपतीति। वर्षा
थे पुनः प्रसृतो वा ब्रूयाद्वृष्टिकामोस्मीयध्वर्युं ब्रूयात्सुरोवाचं ववि घृतं च मनसा ध्यायेस एवमादिनि
गदव्याख्यातं॥ ॥सर्वाण्यतानीति च। अर्थानि दृष्टेन शब्दनिर्दिष्टः। यत्कारणं न श्रुतानीसे तावता
नैरुक्त्यं भवति। ततः प्रतिपदमुच्चारणमिति। इदानीं दर्शपूर्णमासयोरेवारंभनिमित्तमंगमाह॥
अन्वारंभणीयाग्नावैष्णव एकादशकपालः सरस्वत्यै चरुः सरस्वते द्वादशकपालो दर्शपूर्णमासा
रंभो॥ ॥एकादशाकपालग्रहणं न कर्त्तव्यं। अग्नीषोमीयविकारत्वाद्देवतस्मासंताकर्त्तव्यं वौ।कपाला

का॰पू॰ नोपयस्य विधानं यथा स्यादिति। ततश्च तद्गुणकामप्रवृत्तिरिति केचित्। दर्शपूर्णमासारंभ इति
२ श्रुतत्वात् प्रथमप्रथमप्रयोग एव भवति। एवं हि श्रूयते। दर्शपूर्णमासावारंभमाणोन्वारंभणी
ययायजेतेति। आरंभस्य चावृद्धिघमानत्वाद्धि कारेपि प्रवृत्तिः। यथाग्रयणेष्ट्यावस्तु मीस्वेषु चात्रार
भस्य एकत्वात् सकृदेव भवति। सामवत्सादिषु त्वारंभभेदात् पुनः पुनः प्रयोगः॥ ॥ पष्ठौही दक्षिणा
मिथुनौ वा पृष्टे नयावोढुं समर्थौ वृषभ माष पृष्ठौही मिथुनौ वा ति। मिथुनाही होदद्यादिति॥ ॥ इंद्राय
विमृध एकादशकपालः पौर्णमासमनु पौर्णमासेनेष्ट्वा इंद्राय विमृधे नु निर्वपतीति वचनात् सदा
यम्मादिविकल्प्यः। आरवांतरादाहितस्य वारम्यां तादृ कल्प्यः॥ ॥ आदित्यश्चरुरमानस्यां अनुभव
तीति स्पष्टश्चत्रोषः॥ ५॥ आग्रयणमैंद्राग्नमग्रपाकस्य। आग्रयणमिति कर्मणो नामधेयं वक्ष्यमाण
स्य। तत्र च प्रथमं हविरैंद्राग्नं। तस्मादैंद्राग्नोद्वादशकपालः पुरोडाश्तेभवतीति। अग्रपाकग्रहणेन च हेरंब
शरद्वसंतौ लक्ष्येते। तत्कथं अग्रपाको अग्रपाकः। प्रथमपाक इत्यर्थः। स च शरद्वसंतयोर्भवति। शरद्वसं १०

तयोर्भवति शारद्वसंतयोग्रयणमिति च शाखांतरात्॥ ॥ व्रीहीणां यवानां चा चरुरपिया श्यामादि
तियवग्रहणं तेषामेव नियमो मा भूदिति व्रीहिग्रहणे व्रीहिकाले व्रीहीणां यवकाले यवानां। अत
एव यावश्चरुर्भवति वैश्वदेवश्चरुः॥ तस्माद्देववैश्वदेवश्चरुर्भवति॥ ॥पयमिवा॥ स च वाप
य भवति। पयः पपेत्रप्रणीता धर्माः कार्याः॥ ॥ द्यावापृथिवीय एककपालः। अस्य स वैश्वदेवि
क द्यावापृथिवीयप्रकृतित्वात्॥ लिंगदर्शनात्॥ तस्य हि सर्वहुतं करोति। अपर्यावर्तं जुहोति। तिद्वि
ज्ञायते। ते चैतस्य वहोमाऽपरिवर्ती आज्ययागविधिपरवाक्यं अनुवदंति। तस्य पारिच क्षायुस्य
वैकंस्ये चरुदेवतायै हविर्गृह्यते सर्वत्रैव स्विष्टकृदन्वाभक्तो थैतद् सर्वमेव जुहोति न स्विष्टकृते व
घति सा परिचक्षाउते हुतः प्रयोवर्तते तस्माद्धितीयापरिवर्ता तद्वेतदुभयमप्यनिष्टमिया आज्यस्ये
वयागः कर्तव्य इति। तस्माद्वैश्वदेविके कपाल पुनर्तति समिति। एवं च समतिचे द्यावाबर्हिरहतं वासः
परिधानं चेहापि भवति। नव प्रयाजा द्यपीति चेत्। नेदाम्नवैश्वदेवविरोधात्। आज्ययागेपि वासः

क॰ पू॰ परिधानादिभवद्धितिचेत् । नैतदेवं पुरोडाशेनहि तस्य सर्वोपसंस्थापितेनचान्यस्यासौधर्मः । तस्मादप्रवृ
१८ त्तिरिति यत्तुवायव्ये पयसिद्रव्यन्यायप्राप्तुं संभवति । युक्तं तत्र प्रत्यक्षोत्पासौधर्मः । इहपुनश्चोदकइ
ति ॥ ॥ उद्धृत्यांताश्चाद्यथेदाज्येनात ऋतुतदाज्यं लौकिकं अपूर्वत्वात् ॥ ॥ आज्यस्यवा यज्ञेत् ॥ तस्मा
दाज्येस्येव पजेतेति वचनात् ॥ ॥ पुराणानां वा चरुः । वैश्वदेवश्चरुर्वा पुराणानां कर्त्तव्यः । तद्वैपु
राणामं कुर्यादित्याहहरितिवताल । वा नवानां तौवाउभावेव नवानां ईः स्याताम् इति ॥ ॥ प्रथमजो गौर्द
क्षिणा । प्रथमश्च गौर्न गोकुलस्याप्रतीतत्वात् । गोश्च जन्मनासंबंधोत्तः प्रतीतत्वालाग्थम्यं तदपेसां प्र
संगमुपजीवनाह ॥ ॥ वैश्वदेवस्य च । प्रथमजो गौर्दक्षिणा ॥ ॥ दर्शपूर्णमासानीजानो दक्षिणाग्निप
क्वचातुः पाश्यं ब्राह्मणाद्यं भोजयेत्किंचिद्दद्यात् । आहिताग्निः सयावद्दर्शपूर्णमासौ न करोति । अथवा
ग्रयणकालप्राप्तिपत्तिर्भवति । तत्राग्रयणे विशेषः कथ्यते । नवानां दक्षिणाग्निपक्वं चातुःप्राश्यं ब्राह्मणा हेरंब
न्भोजयित्वा किंचिद्दद्यात् । तत्रोपयद्वक्तुं तद्दद्यादिति वचनात् । अस्य चाग्रयणात्वासौ पौर्णमास्यमावास्या १८

काल इति॥ ॥अग्निहोत्रयणिनोतवैः सायंप्रातरग्निहोत्रहोमः अग्निहोत्रेणैवयो नामायनं कर्तुमिच्छति। अ
ग्निहोत्रेणैवाग्रयणंगमयतीत्यर्थः। सनवैः सायंप्रातरग्निहोत्रहोमं कुर्यात्। यः सायंप्रातरग्निहोत्रहोमः स
नवैः कर्तव्यः। नह्युतदाग्रयणं सायंप्रातर्ग्रहणाद्देवाः आग्रयणप्राप्तिरिति। तथा च दर्शपूर्णमासानीजा
नस्य वा तु प्राश्यविधिपरे वाक्ये अग्निहोत्रहोमं प्रतिषेधति। नाग्निहोत्रं जुहुयादन्यत्राग्रयणमन्य
दग्निहोत्रमिति। अतश्चात्र नयजनीपकालनियम इति॥ ॥तदाशिता वा पयसा। नह्यागोः पयसा जुहोति॥
॥दीक्षितव्रतं चातकालातिपाते न वाशिता यागोः पयसा कर्तव्या॥ ॥उपसत्सु रोहिणेऽकवीत। उप
सत्सु वर्तमानासु नवद्रव्येण रोहिणो कर्तव्यो॥ ॥सुसामु सवनीयाः कर्तव्यः॥ ॥सौम्यः श्यामाकश्च
रु सारण्यस्य॥ आरण्याग्रयणं श्यामाकनीवारादि। आरण्यग्रहणाच्चसोऽतते तेन लभ्यत इति॥ ॥वेणवो ग्रीष्मे
। सौम्यः कर्तव्यः। श्यामाकचरीश्च कालानिर्दिष्टा तृशरद्येव भवति॥ ॥पुनः संस्कृतो रथो दक्षिणा सोमं मधु
पर्को वर्षाधृतं वा वासः॥ क्षौम मात समुच्यते। वर्षासु यस्य रिहितं जुतमियेको तत्र धृतशब्दो नाज सोम भवति

क०पू० ।तस्माद्दर्शासुयद्धृतं पारिहृतं तद्देवं ग्रहीतव्यमिति॥ ७॥ ॥अमावास्यायामग्न्याधेयं। अग्न्याधेयमिति
१९ कर्मणो नामधेयं। तच्च समुदायस्येति न ह्यसावग्नीराधायते। उसाद्यते निष्पाद्यते। न मंथनमात्रं। स्थाप
नमात्रं वा। आहवनीयशब्दो हि संस्कारनिमित्तः। न जातिनिमित्तो वा। तेषु सत्सु शब्दप्रयोगदर्शनात्। अ
तश्च वा कश्चिद्दृष्टार्थो वाऽदृष्टार्थो वा तत्संस्कारा याम्नायते। स सर्वोग्न्याधेयशब्दवाच्यः। एवं च सति संस्का
रैर्देशाभावेपि अनाहवनीयता॥ अतश्च सकलकर्मसमुदायाभ्याहत्तिरिति संप्रदायः। अत्र वदामः। क
श्चित्संस्कारोंगवान्नवति। यथा पूर्णाहुत्यामाज्याधिश्रयणादयं। तूष्णीमग्निहोत्रे च परिस्तरणादिरिष्टिषु वा
न्यन्वाधानादिर्यस्यैवांगिनोंगापवारस्तस्यैवावृत्तिर्युक्तरूपा। न सकलस्याधानस्येति। न चेहांगापचारे
पि प्रायश्चित्तं भवति। आहवनीयाद्यधिष्ठानाभावात्। ननु चविधंत एवाहवनीयादयः। त्रिभिरस्त्रैर्गार्ह
पत्यमादधाति पंचभिराहवनीयमिति प्रयोगदर्शनात्। नेत्युच्यते। यदीयतैवाहवनीयाद्युत्पत्तिः स्यात्तेषंवै हेरंब
यर्थ्यमेव स्यात्तस्मात्संचभिराहवनीयमादधातीत्यंचभिराहवनीयमिति इति भाविनी वृत्तिः। अतो नैमित्तिक १९

होमस्याभावः। यद्येवं पूर्णाहुत्यादिहोमोप्यत्र न भवति। उच्यते। आहवानीयसंस्कारायैषा विधाना
दिह दोषः॥ तस्मादिह विहितानां भाविनीहुतिर्युक्ता॥ न तु नैमित्तिकहोमानां। ते हि सत्याहवनीये
विधीयते। पूर्णाहुत्यादयस्तु तदुत्सर्थतयेति विशेषः॥ आमावास्यात्र्यवश्याचगोण्याहृत्सा प्रतिपद्वि
षयः। एवं हि श्रूयते। आधानप्रकृतस्य यदहरेवैष न पुरस्तान्न पश्चाद्दृशे पततदहरुपवसेदिति। उपवासश्चाव्द
श्वयमनियमापेक्षः। यदहरस्य श्वोऽग्न्याधेयं स्यादिति वै वा। श्वी यादित्येवमादिविधानात्। तस्मादमावास्याया
मुपक्रम्य प्रतिपद्याधानं। कृत्तिकादिषु तु नैवानेहि तत्रैव वचनमस्ति॥ ॥ कृत्तिकारोहिणीमृगशिरःफल्गु
नीषु। स चायं विकल्पः। कृत्तिकास्वग्नीआदधीतेति निरपेक्षविधानात्। ननु चामावास्यायां कृत्तिकास्विति
चकिमिति न भवति। नैतदेवं। एवं हि समामनंति। स यो मावास्यायामग्नीआधत्तेय याविहृतायां द्वारि द्वारापुरं
प्रपद्येत स तत एव स्वर्गं लोकमियादेवं तदिममावास्यायां विधाय नक्षत्रनिषेधेन संस्तौति। अथ यो न सत्र
आधत्ते यथापिहितायां द्वार्यद्वारापुरं प्रपित्सेत्स जिह्मः पुरः स्यादेवं तादृगिति। तस्मादत्रापि न सत्र विकल्पः॥ ॥

का॰पू॰ हस्तौ लाभकामस्य। स चायं विशिष्टो लाभ उच्यते न लाभमात्रं। यद् इच्छेत् स्वमे दीयेतेति वचनात्। तस्माद्धस्ति
२०॥ ग्रहलाभः॥ अतश्च ब्राह्मणविषय एवायं॥ ॥चित्रा च क्षत्रियस्य॥ चत्रा बा लाभकामस्य॥ ॥वसंतो ब्राह्म
णब्रह्मवर्चसकामयोः। तस्माद्ब्राह्मणो वसंत आदधीतेति वचनात्। ब्रह्मवर्चसकामो वसंत आदधीतेति
। ब्रह्मवर्चसं च ब्राह्मणस्यैवोचितं। तस्मात्सकामनिष्कामयोर्ब्राह्मणयोरिति॥ ॥ग्रीष्मः क्षत्रियश्रीकामयो
॥ग्रीष्मः क्षत्रियस्याधानकालो भवति। तस्मात् क्षत्रियो ग्रीष्म आदधीतेति वचनात्। श्रीअकामो ग्रीष्म आ
दधीतेति हि श्रूयते। सर्वविषयं चैतद्विशेषानवगमात्॥ ॥वर्षाः प्रजापशुकामवैश्यरथकृतां॥ आधान
कालो भवति प्रजाकामः पशुकामवैश्यरथकृतां॥ कामसंबंधश्च सर्वविषयः। न वैश्यविषय एवावैश्या
वर्षास्वादधीतेति चानिष्कामस्यापि वैश्यस्य वर्षासु रथकार आदधीतेति च रथकारस्य वर्षाः इदानीं पू
वैधुरुपक्रममाह॥ ॥अग्न्यागारे कुर्वति। बहुवचनोपदेशाद्दर्भच्छन्नता॥ ॥उदग्द्वारं वा पूर्वं वा प्राग्वंशं हेरंब
। पूर्वं प्राग्वंशमेव॥ ॥दक्षिणपूर्वे द्वारो अपरस्य दक्षिणं। पूर्वस्य पूर्वं न त्वेकैकस्य द्वारद्वयविधान उपयद्य २०

ते। यस्मात् परस्य पूर्वेसामर्थ्ये परिप्राप्तं॥ पौर्णमासवद्रूपनं भवति। वर्तिनाच अशेषमतिदृश्यते। विकल्प
स्यतु सूत्रांतराभिहितत्वात्॥ तेनु न सत्रसंभारसामवपनादीन् त्वा कुर्यादिति॥ ॥क्षौमे वसते अहते पत्नी च।
क्षौमे आतसा। अहते अधौते पत्नी च क्षौमे वसनाव अग्नी आदधीयातामिति वचनात्॥ ॥सर्वं स्थिते
ध्वर्यवेदेये। तेच परिसमाप्ते आध्वर्यवेदेये॥ ॥गार्हपत्यागारे निर्मथ्याभ्यादधाति॥ मंथनं संनिधाना
प्रस्तताभ्यासेवारणिभ्यां। अनयोर्हि संनिधानात्॥ ॥वैश्यकुलांबरीषमहानसाद्वा। वैश्यकुलादपरि
गृहीतोहृतो लिप्त्वो वा परिगृह्यते। अंबरीषो भ्राष्ट्रः। कंडुरितियः प्रसिद्धः। महानसो यत्रा क्षीणोग्निः। यथा
लौकिकेषु सत्रेषु॥ ॥दिवा श्वाति रात्रौ वा। यद्दहरेस्य भोग्न्याधेयं स्यात् दिवैवाग्नीयादिति। न चायं दि
वसनियमः। किंतर्हि। राच्यत्रानाविकल्प्यार्थमिदमुक्तं। तद्रूपिकाममेव नक्तेश्नीयादिति॥ ॥उपास्तमयं
